Gandhi Memorial College Of Education Bantalab Jammu

103

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अथ

भवानीसहस्रनाम-

प्रारम्भः ।

G.M. College of Education
Raipur, ...
Jammu.
Acc. No. 212 —D
Dated 6.10.05

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

62 B / R

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu



CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

श्रीगणेशाय नमः ॥ ॥ ॐ नमो भग-
Gandhi Memorial College Of Education Bantalab Jammu
वत्यै ॥ ॐ नमो भवान्यै ॥ ॐ शंखचक्र-
शूलशरचापकरां त्रिनेत्रां तिग्मेतरांशुक-
लया विलसत्किरीटाम् ॥ सिंहस्थिताम-
सुरसिद्धनुतां च दुर्गां दुर्गानिभां दुरितदुः-
खहरां नमामि ॥ १ ॥ ॐ अकुलकुलपतंती
चक्रमध्ये स्फुरंती मधुरमधु पिबंती कंट-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भ० कान्भक्षयंती ॥ दुरितमपहरंती साधका- स०
१ न्पोषयंती जयति जगति देवी सुंदरी
क्रीडयंती ॥ २ ॥ चतुर्भुजामेकवक्त्रां पूर्णे-
न्दुवदनप्रभाम् ॥ खड्गशक्तिधरां देवीं वर-
दाभयपाणिकाम् ॥ ३ ॥ प्रेतसंस्थां
महारौद्रीं भुजगेनोपवीतिनीम् ॥ भवानीं
कालसंहारवज्रमुद्राविभूषिताम् ॥ ४ ॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

जगत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः सु-
Gandhi Memorial College Of Education Bantalab Jammu
रैः॥स्तुतांतां परमेशानीं नौम्यहं विघ्नहा-
रिणीम्॥५॥ॐनमो भवान्यै॥ॐकैलास-
शिखरे रम्ये देवदेवं महेश्वरम् ॥ध्यानोप-
रतमासीनं प्रसन्नमुखपंकजम् ॥६॥ सुरा-
सुरशिरोरत्नरंजितांघ्रियुगं प्रभुम् ॥ प्रण-
म्य शिरसा नंदी बद्धांजलिरभाषत॥७॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स० श्रीनंदिकेश्वर उवाच ॥ ॥ देवदेव जगन्ना- स०
२ थ संशयोऽस्ति महान्मम ॥ रहस्यमेकमि-
च्छामि प्रष्टुं त्वां भक्तवत्सल ॥ ८ ॥ देवता-
यास्त्वया कस्याः स्तोत्रमेतद्दिवानिशम् ॥
पठ्यतेऽविरतं नाथ त्वत्तः किमपरं महत्
॥ ९ ॥ इति पृष्टस्तदा देवो नंदिकेन जगद्गुरुः २
प्रोवाच भगवानेको विकसन्नेत्रपंकजः ॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
॥ १० ॥ श्रीभगवानुवाच ॥ ॥ साधु
साधु, गणश्रेष्ठ, पृष्टवानसि, मां, च यत् ॥
स्कंदस्यापि, च यद्गोप्यं रहस्यं, कथयामि,
तत् ॥ ११ ॥ पुराकल्पक्षये, लोकान्, सिसृक्षु-
र्मूढचेतसः ॥ गुणत्रयमयी, शक्तिर्मूलप्रकृ-
तिसंज्ञिता, ॥ १२ ॥ तस्यामहं समुत्पन्न-
स्तत्त्वैस्तैर्महदादिभिः ॥ चेतनेति ततः
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

शक्तिमां कांप्यालिग्य तस्थुषीं ॥ १३ ॥
हेतुः संकल्पजालस्य मनोऽधिष्ठायिनी
शुभा॥ इच्छेति परमा शक्तिरुन्मिमीलत-
तःपरम॥ १४ ॥ ततोवागिति विख्याता
शक्तिःशब्दमयीपुरा॥ प्रादुरासीज्जगन्मा-
ता वेदमाता सरस्वती॥ १५ ॥ ब्राह्मी
च वैष्णवी रौद्री कौमारी पार्वती शिवा॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

सिद्धिदा बुद्धिदा शांता सर्वमंगलदायिनी
Gandhi Memorial College Of Education Bantalab Jammu
॥ १६ ॥ तयैतत्सृज्यते विश्वमनाधारं च
धार्यते ॥ तयैतत्पाल्यते सर्वं तस्यामेव
प्रलीयते॥ १७॥ अर्चिता प्रणता ध्याता
सर्वभावाविनिश्चितैः ॥ आराधिता स्तुता
सैव सर्वसिद्धिप्रदायिनी॥ १८॥ तस्या अ-
नुग्रहादेवतामेव स्तुतवानहम्॥ सहस्रैर्ना-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स॰ ४

माभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः ॥ १९॥
स्तवेनानेन संतुष्टा मामेव प्रविवेश सा॥ त-
दारभ्य मया प्राप्तमैश्वरं पदमुत्तमम्॥ २०॥
तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् ॥
ससुरासुरगंधर्वं यक्षराक्षसमानवम्॥ २१॥
सपन्नगंसाब्धिकं च सशैलवनकाननम् ॥
सराशिग्रहनक्षत्रं पंचभूतगुणान्वितम् ॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

॥२२॥ नंदिनामसहस्रेण स्तवेनानेन स-
Gandhi Memorial College Of Education Bantalab Jammu
र्वदा ॥ स्तुवे परापरां शक्तिं ममानुग्रहका-
रिणीम्॥२३॥ इत्युक्त्वोपरतं देवं चराच-
रगुरुं विभुम्॥प्रणम्य शिरसा नंदी प्रोवाच
परमेश्वरम् ॥ २४ ॥ श्रीनंदिकेश्वर
उवाच ॥ भगवन्देवदेवेश लोकनाथ जग-
त्पते ॥ भक्तोऽस्मि तव दासोऽस्मि प्रसादः
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
क्रियतां मयि ॥ २५ ॥ देव्याः स्तवमिमं
पुण्यं दुर्लभं यत्सुरैरपि ॥ श्रोतुमिच्छाम्य-
हं देव प्रभावमपि चास्य तु ॥ २६ ॥
श्रीभगवानुवाच ॥ ॥ शृणु नंदिन्महाभा-
गस्तवराजमिमं शुभम् ॥ सहस्रैर्नामभि-
र्दिव्यैः सिद्धिदं सुखमोक्षदम् ॥ २७ ॥ शु-
चिभिः प्रातरुत्थाय पठितव्यं समाहितैः ॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

त्रिकालं श्रद्धया युक्तेनातः परतरः स्तव; ॥ २८ ॥ अथ न्यासः ॥ ॥ ॐ ऐकवीरायै अंगुष्ठाभ्यां नमः ॥ ॐ महामायायै तर्जनीभ्यां नमः ॥ ॐ पार्वत्यै मध्यमाभ्यां नमः ॥ ॐ गिरिशप्रियायै अनामिकाभ्यां नमः ॥ ॐ गौर्यै कनिष्ठिकाभ्यां नमः ॥ ॐ करालिन्यै करतलकरपृ-

Gandhi Memorial College Of Education Bantalab Jammu
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ष्ठाभ्यां नमः ॥ ॥ इति करन्यासः ॥
एवं षडंगन्यासः ॥ ॥ ॐ एकवीरायै हृद-
याय नमः ॥ ॐ महामायायै शिरसे स्वा-
हा ॥ ॐ पार्वत्यै शिखायै वषट् ॥ ॐ गिरि-
शप्रियायै कवचाय हुम् ॥ ॐ गौर्यै नेत्रत्र-
याय वौषट् ॥ ॐ करालिन्यै अस्त्राय फ-
ट् ॥ ॥ ॐ अस्य श्रीभवानीनामसहस्र

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

स्तवराजस्य श्रीभगवान्महादेव ऋषिः ॥
Gandhi Memorial College Of Education Bantalab Jammu
अनुष्टुप् छन्दः ॥ आद्या शक्तिः ॥ श्रीभ-
गवती भवानी देवता ॥ ह्रीं बीजम् ॥ श्रीं
शक्तिः ॥ ह्रीं कीलकम् ॥ श्रीभगवती-
भवानीसंतोषणार्थे सकलकामनासि-
द्ध्यर्थे पाठे जपे विनियोगः ॥ अथ
ध्यानम् ॥ ॐ अर्धेन्दुमौलिममलाममर-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भ० राभिवन्द्यामम्भोजपाशसृणिरक्तकपा- स०
७ लहस्ताम् ॥ रक्ताङ्गरागवसनाभरणां
त्रिनेत्रां ध्यायेच्छिवस्यवनितां मदाविह्व-
लांगीम्॥ ॐ बालार्कमण्डलाभासां चतु-
र्बाहुं त्रिलोचनाम् ॥ पाशांकुशशरं चापं
धारयंतीं शिवां भजे ॥ ॥ ॐ श्रीईश्वर ७
उवाच॥ ॥ ॐ महाविद्याजगन्माता महा-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

लक्ष्मीः शिवप्रिया ॥ विष्णुमाया शुभा
Gandhi Memorial College Of Education Bantalab Jammu
शांता सिद्धा सिद्धसरस्वती॥ १ ॥ क्षमा
कांतिःप्रभा ज्योत्स्ना पार्वती सर्वमंगला
हिंगुला चंडिका दांता पद्मालक्ष्मीर्हरिप्रि-
या॥२॥त्रिपुरा नंदिनी नंदा सुनंदासुरवं-
दिता ॥ यज्ञविद्या महामाया वेदमाता
सुधा धृतिः॥ ३॥प्रीतिः प्रथा प्रसिद्धा च
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भ० मृडानी विंध्यवासिनी ॥ सिद्धविद्या महा स०
८ शक्तिः पृथ्वी नारदसेविता ॥ ४ ॥ पुरुहूत
प्रिया कांता कामिनी पद्मलोचना ॥ प्र-
ह्लादिनी महामाता दुर्गा दुर्गतिनाशिनी
॥ ५ ॥ ज्वालामुखी सुगोत्रा च ज्योतिः
कुमुदहासिनी॥दुर्गमा दुर्लभा विद्या स्वर्ग ८
तिःपुरवासिनी॥६ अपर्णा शांबरी माया

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मंदिरा मृदुहासिनी ॥ कुलवागीश्वरी नि-
त्या नित्यक्लिन्ना कृशोदरी ॥७॥ कामेश्व
रीच नीलाच भेरुंडावह्निवासिनी॥लंबो-
दरीमहाकाली विद्या विद्येश्वरी तथा॥८॥
नरेश्वरीच सत्या च सर्वसौभाग्यवर्धिनी
संकर्षणी नारसिंही वैष्णवी च महोदरी
॥९॥कात्यायनी च चंपा च सर्वसंपत्ति-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

म० कारिणी ॥ नारायणी महानिद्रा योगनि- स०
१ द्रा प्रभावती ॥ १० ॥ प्रज्ञापारमिता प्रज्ञा
तारा मधुमती मधु ॥ क्षीरार्णवसुधाहारा
कालिका सिंहवाहना ॥ ११ ॥ ॐकारा
च सुधाकारा चेतना कोपना कृतिः ॥
अर्धबिंदुधराधारा विश्वमाता कलावती ९
॥ १२ ॥ पद्मावती सुवस्त्रा च प्रबुद्धा च सर-

Gandhi Memorial College Of Education Bantalab Jammu
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
स्वती ॥ कुंडासना जगद्धात्री बुद्धमाता
जिनेश्वरी ॥ १३॥ जिनमाता जिनेंद्रा च
शारदा हंसवाहना ॥ राज्यलक्ष्मीर्वषट्कारा
सुधाकारा सुधोत्सुका॥ १४ ॥ राजनीति-
त्रयीवार्ता दंडनीतिः क्रियावती ॥ सद्भू-
तिस्तारिणी श्रद्धा सद्गतिःसत्परायणा
॥ १५ ॥ सिंधुर्मंदाकिनी गंगा यमुना च
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भ० सरस्वती ॥ गोदावरी विपाशा च कावेरी स०
१० च शतह्रदा ॥ १६ ॥ सरयूश्चंद्रभागा च
कौशिकी गंडकी शुचिः॥नर्मदाकर्मनाशा
च चर्मण्वत्यथ वेदिका ॥ १७ ॥ वेत्रवती
वितस्ता च वरदा नरवाहना ॥ सती पति-
व्रतासाध्वी सुचक्षुः कुंडवासिनी ॥ १८ ॥ १०
एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

नी॥ सेना श्रेणिः पताका च सुव्यूहा युद्ध-
Gandhi Memorial College Of Education Bantalab Jammu
कांक्षिणी ॥ १९ ॥ पताकिनी दया रंभा
विपंची पंचमाप्रिया ॥ परापरकला कांता
त्रिशक्तिर्मोक्षदायिनी॥२०॥ऐंद्री माहेश्व-
री ब्राह्मी कौमारी कूलवासिनी ॥इच्छाम-
गवती शक्तिः कामधेनुः कृपावती॥ २१ ॥
वज्रायुधा वज्रहस्ता चंडी चण्डपराक्रमा ॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी
॥ २२ ॥ एकानेका महेज्या च शतबाहु-
र्महाभुजा ॥ भुजंगभूषणा भूषा षट्चक्र-
क्रमवासिनी॥२३॥ षट्चक्रभेदिनी श्या-
मा कायस्था कायवर्जिता सुस्मिता सु-
मुखी क्षामा मूलप्रकृतिरीश्वरी॥२४ ॥ अ-
जा च बहुवर्णा च पुरुषार्थप्रवर्तिनी॥रक्ता

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

नीलासिताश्यामा कृष्णा पीता च कर्बुरा
Gandhi Memorial College Of Education Bantalab Jammu
॥२५॥क्षुधा तृष्णा जरा वृद्धा तरुणी क-
रुणालया॥कला काष्ठा मुहूर्ता च निमि-
षा कालरूपिणी ॥ २६ ॥ सुवर्णरशना
नासा चक्षुःस्पर्शवती रसा॥ गंधप्रिया सु-
गंधा च सुस्पर्शा च मनोगतिः ॥ २७ ॥
मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पद्मयोनिः सुकेशी च सुलिंगा भगरूपिणी ॥२८॥ योनिमुद्रा महामुद्रा खेचरी खग-गामिनी॥ मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता ॥ २९ ॥ मातंगी शुकहस्ता च पुष्पबाणेक्षुचापिनी ॥ रक्तांबरधरा क्षीबा रक्तपुष्पावतंसिनी ॥ ३० ॥ शुभ्रांबरधरा धीरा महाश्वेता वसुप्रिया ॥ सुवेणी प-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ग्रहस्ता च मुक्ताहारविभूषणा ॥ ३१ ॥
कर्पूरामोदनिःश्वासा पद्मिनी पद्ममंदिरा॥
खड्गिनी चक्रहस्ता च भुशुंडी परिघायुधा
॥ ३२ ॥ चापिनी पाशहस्ता च त्रिशूल-
वरधारिणी॥सुबाणाशक्तिहस्ता च मयूर-
वरवाहना ॥ ३३ ॥ वरायुधधरा वीरा
वीरपानमदोत्कटा ॥वसुधा वसुधारा च

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

 जया शाकंभरी शिवा ॥ ३४ ॥ विजया
 च जयंती च सुस्तनी शत्रुनाशिनी ॥ अंत-
र्वत्नी वेदशक्तिर्वरदा वरधारिणी ॥ ३५ ॥
शीतला च सुशीला च बालग्रहविनाशि-
नी ॥ कौमारी च सुपर्वा च कामाख्या
कामवंदिता ॥ ३६ ॥ जालंधरधरानंता
कामरूपनिवासिनी ॥ कामबीजवती

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

सत्यासत्यधर्म्मपरायणा ॥३७॥ स्थूलमा-
Gandhi Memorial College Of Education Bantalab Jammu
र्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिप्रबोधिनी ॥
षट्कोणा च त्रिकोणा त्रिनेत्रा त्रिपुरसुंदरी
॥३८॥ वृषप्रिया वृषारूढा महिषासुरघा-
तिनी॥शुंभदर्पहरा दीप्ता दीप्तपावकसन्नि-
भा ॥३९॥ कपालभूषणा काली कपाल-
मालधारिणी॥ कपालकुण्डला दीर्घा शि-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Gran

Gandhi Memorial College Of Education Bantalab Jammu

वदूती घनध्वनिः॥ ४०॥ सिद्धिदा बुद्धिदा
नित्या सत्यमार्गप्रबोधिनी ॥ कम्बुग्रीवा
वसुमती च्छत्रच्छायाकृतालया ॥ ४१ ॥
जगद्गर्भा कुण्डलिनी भुजगाकारशायि-
नी ॥ प्रोल्लसत्सप्तपद्मा च नाभिनालमृणा-
लिनी ॥ ४२ ॥ मूलाधारा निराकारा
वह्निकुण्डकृतालया ॥ वायुकुण्डसुखासी-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

ना निराधारा निराश्रया ॥ ४३ ॥ श्वासो-
Gandhi Memorial College Of Education Bantalab Jammu
च्छ्वासगतिर्जीवग्राहिणी वह्निसंश्रया ॥
वल्लीतंतुसमुत्थाना षड्रसास्वादलोलुपा
॥ ४४ ॥ तपस्विनी तपःसिद्धिस्तपसा
सिद्धिदायिनी ॥ तपोनिष्ठा तपोयुक्ता ता-
पसी च तपःप्रिया ॥ ४५ ॥ सप्तधातुम-
यी मूर्तिः सप्तधात्वंतराश्रया॥ देहपुष्टिर्म-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मः पुष्टिरन्नपुष्टिर्बलोद्धता ॥ ४६ ॥ ओष- स०
धिर्वैद्यमाता च द्रव्यशक्तिप्रभाविनी ॥
वैद्या वैद्यचिकित्साच सुपथ्या रोगनाशि-
नी ॥ ४७ ॥ मृगया मृगमांसादा मृगत्वङ्-
मृगलोचना ॥ वागुरा बंधरूपा च बंधरू-
पा वधोद्धता ॥ ४८ ॥ बंदीबंदिस्तुताकारा- १५
गारबन्धविमोचिनी ॥ शृंखला खलहा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

विद्या हृद्बन्धविमोचिनी ॥ ४९ ॥ अं-
Gandhi Memorial College Of Education Bantalab Jammu
बिका बालिका चाबा स्वक्षा साधुजना-
र्चिता ॥ कौलिकी कुलविद्या च सुकला
कुलपूजिता ॥ ५० ॥ कालचक्रभ्रमिभ्रां-
ता विभ्रामा भ्रमनाशिनी ॥ वात्याली मे-
घमाला च सुवृष्टिः सस्यवर्धिनी ॥ ५१ ॥
अकारा च इकारा च उकारैकाररूपिणी ॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu स०

ह्रींकारी बीजरूपा च क्लींकारांबरवासि-
नी ॥ ५२ ॥ सर्वाक्षरमयी शक्तिरक्षरा व-
र्णमालिनी॥ सिंदूरारुणवर्णा च सिंदूराति-
लकप्रिया ॥ ५३ ॥ वश्या च वश्यबीजा
च लोकवश्यविभाविनी॥ नृपवश्या नृपैः १६
सेव्या नृपवश्यकरी प्रिया ॥ ५४॥ महि-
षा नृपमान्या च नृमान्या नृपनंदिनी ॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

नृपधर्ममयी धन्या धनधान्यविवर्धिनी
Gandhi Memorial College Of Education Bantalab Jammu
॥५५॥ चतुर्वर्णमयी मूर्तिश्चतुर्वर्णैश्च पू-
जिता ॥ सर्वधर्ममयी सिद्धिश्चतुराश्रम-
वासिनी ॥५६॥ ब्राह्मणी क्षत्रिया वैश्या
शूद्रा चावरवर्णजा॥वेदमार्गरता यज्ञा वे-
दिर्विश्वविभाविनी ॥ ५७ ॥ असुरशस्त्रम-
यी विद्या वरशस्त्रास्त्रधारिणी ॥ सुमेधा
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भ० सत्यमेधा च भद्रकाल्यपराजिता ॥५८॥ स०
१७ गायत्री सत्कृतिः संध्या सावित्री त्रिपदा-
श्रया॥ त्रिसंध्या त्रिपदी धात्री सुपर्वा सा-
मगायनी ॥५९॥ पांचाली बालिका बा-
ला बालक्रीडा सनातनी ॥ गर्भाधारधरा
शून्या गर्भाशयनिवासिनी॥६०॥ सुरा- १७
रिघातिनी कृत्या पूतना च तिलोत्तमा ॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
लज्जा रसवती नंदा भवानी पापनाशिनी ॥ ६१ ॥ पट्टांबरधरा गीतिः सुगीतिर्ज्ञान-लोचना ॥सप्तस्वरमयी तंत्री षड्ज मध्यम-धैवता ॥६२ ॥मूर्च्छनाग्रामसंस्थाना मूर्च्छासुस्थानवासिनी॥अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी ॥ ६३ ॥ गीतनृत्यप्रिया कामा तुष्टिदा पुष्टिदाक्षया ॥ नि-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
भ० ष्ठा सत्यप्रिया प्रज्ञा लोलाक्षी चसुरोत्तमा स०
१८ ॥ ६४ ॥ सविषा ज्वालिनी ज्वालो विश्व-
मोहार्तिनाशिनी ॥ विषारिर्नागदमनी कु-
रुकुल्यामृतोद्भवा ॥ ६५ ॥ भूतभीतिहरा
रक्षा भूतावेशविनाशिनी ॥ रक्षोघ्नी राक्ष-
सी रात्रिर्दीर्घनिद्रानिवारिणी ॥ ६६ ॥ १८
चंद्रिका चंद्रकांतिश्च सूर्यकांतिर्निशाच-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

री ॥ डाकिनी शाकिनी शिष्या हाकिनी
Gandhi Memorial College Of Education Bantalab Jammu
चक्रवाकिनी॥६७॥सिता सितप्रिया स्वं-
गा सकला वनदेवता ॥ गुरुरूपधरा गुर्वी
मृत्युर्मारी विशारदा ॥ ६८ ॥ महामारी
विनिद्रा च तंद्रा मृत्युविनाशिनी॥ चंद्रमं-
डलसंकाशा चंद्रमंडलवासिनी॥६९॥अ-
णिमादिगुणोपेता सुस्पृहा कामरूपिणी॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी
॥ ७० ॥ अनादिनिधना पुष्टिश्चतुर्बाहुश्च-
तुर्मुखी ॥ चतुःसमुद्रशयना चतुर्वर्गफल-
प्रदा ॥७१॥ काशपुष्पप्रतीकाशा शरत्कु-
मुदलोचना ॥ भूताभव्या भविष्या च शैल-
जा शैलवासिनी ॥७२॥ वाममार्गरतावा-
माशिवावामांगवासिनी ॥ वामाचारप्रि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

या तुष्टिर्लोपामुद्रा प्रबोधिनी ॥७३॥ भू-
Gandhi Memorial College Of Education Bantalab Jammu
तात्मा परमात्मा च भूतभावाविभाविनी ॥
मंगला च सुशीला च परमार्थप्रबोधिनी
॥७४॥ दक्षिणा दक्षिणामूर्तिःसुदीक्षा च
हरिप्रसूः ॥ योगिनी योगयुक्ता च योगां-
गा ध्यानशालिनी ॥७५॥ योगपट्टधरा
मुक्ता मुक्तानां परमागतिः ॥ नारसिंही स-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स०

म० जन्मा च त्रिवर्गफलदायिनी ॥७६ ॥ ध-
२० र्मदा धनदा चैका कामदा मोक्षदा द्युतिः॥
साक्षिणीक्षणदा दक्षा मोक्षदा कोटिरूपि-
णी ॥७७॥ क्रतुः कात्यायिनी स्वच्छा सु-
च्छंदा च कविप्रिया॥सत्यागमा बहिस्था
च काव्यशक्तिःकवित्वदा ॥७८॥ मीनपु- २०
त्री सती माता मैनाकभगिनी तडित्॥सौ-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

दामिनी सुदामाच सुदामाधामशालिनी
Gandhi Memorial College Of Education Bantalab Jammu
॥ ७९ ॥ सौभाग्यदायिनी द्यौश्च सुभ-
गा द्युतिवार्धिनी ॥ श्रीकृत्तिवसना चैवकं-
काली कलिनाशिनी ॥८०॥ रक्तबीजव-
धोद्युक्ता सुतंतुबीजसंतति: ॥ जगज्जीवा
जगद्बीजा जगत्त्रयहितैषिणी ॥८१॥ चा-
मीकररुचिश्चांद्री साक्षाद्या षोडशीकला॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

यत्तत्पदानुबन्धाच यक्षिणी धनदार्चिता
॥८२॥ चित्रिणी चित्रमाया च विचित्रा
भुवनेश्वरी ॥ चामुंडा मुंडहस्ता च चंडमु-
ण्डवधोद्यता ॥ ८३ ॥ अष्टम्येकादशी पूर्णा
नवमी चचतुर्दशी ॥ अमा कलशहस्ता च
पूर्णकुंभपयोधरा ॥ ८४ ॥ अभीरुर्भैरवी
भीरुर्भीमा त्रिपुरभैरवी ॥ महारुंडा च रौ-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

द्री च महाभैरवपूजिता॥८५॥ निर्मुंडा ह-
Gandhi Memorial College Of Education Bantalab Jammu
स्तिनी चंडा करालदशनानना ॥ कराला
विकराला च घोरा घुर्घुरनादिनी ॥ ८६ ॥
रक्तदंतोर्ध्वकेशी च बन्धूककुसुमारुणा ॥
कादंबिनीपटा सा च काश्मरी कुंकुमप्रि-
या ॥८७॥ क्षांतिर्बहुसुवर्णा च रतिर्बहुसुव-
र्णदा॥ मातंगिनी वरारोहा मत्तमातंगगा-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स० मिनी॥८८॥हंसा हंसगतिर्हंसी हंसोज्ज्व- स०
२२ लशिरोरुहा॥पूर्णचंद्रमुखी क्षामा स्मिता-
स्याश्यामकुण्डला॥८९॥मषी च लेखनी
लेखा सुलेखा लेखकप्रिया॥ शंखिनी शं-
खहस्ता च जलस्था जलदेवता॥९०॥
कुरुक्षेत्रावनिः काशी मथुरा काँच्यवंति- २२
का॥अयोध्या द्वारिका माया तीर्था तीर्थ-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

करप्रिया ॥ ११ ॥ त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी ॥ कौशिकी तु कुशावर्ता कौशाम्बी कोशवर्द्धिनी ॥ १२ ॥ कोशदा पद्मकोशाक्षी कुसुंभकुसमाप्रिया ॥ तोतला च तुलाकोटिः कोटस्था कोठराश्रया ॥ १३ ॥ स्वयंभूश्च सुरूपा च स्वरूपा पुण्यवर्धिनी ॥ तेजस्विनी सुभिक्षा च

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

म० बलदा बलदायिनी ॥ १४ ॥ महाकोशी स०
२३ महावार्ता बुद्धिः सदसदात्मिका ॥ महाग्र-
हहरा सौम्या विशोका शोकनाशिनी
॥ १५॥ सात्त्विकी सत्त्वसंस्था च राजसी
च रजोवृता ॥ तामसी च तमोयुक्ता गुण-
त्रयविभाविनी ॥ १६ ॥ अव्यक्ता व्यक्त- २३
रूपा च वेदविद्या च शांभवी ॥ शंकरा क-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant.

Gandhi Memorial College Of Education Bantalab Jammu
लिपनी कल्पा मनःसंकल्पसंततिः ॥१७॥
सर्वलोकमयी शक्तिः सर्वश्रवणगोचरा ॥
सर्वज्ञानवती वांछा सर्वतत्त्वावबोधिका
॥ १८ ॥ जागृतिश्च सुषुप्तिश्च स्वप्नावस्था
तुरीयका ॥ सत्वरा मंदरा मंदा मंदिरा-
मोदधारिणी ॥ १९ ॥ पानभूमिः पानपा-
त्रपानदानकरोद्यता ॥ अपूर्णारुणनेत्रा
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

च किंचिदव्यक्तभाषिणी ॥ १०० ॥ आ- स०
शापूरा च दीक्षा च रक्षा दीक्षितपूजिता ॥
नागवल्ली नागकन्या भोगिनी भोगवल्ल-
भा ॥ १ ॥ सर्वशास्त्रमयी विद्या सुस्मृतिर्ध-
र्मवादिनी ॥ श्रुतिस्मृतिधरा ज्येष्ठा श्रेष्ठा
पातालवासिनी ॥ २ ॥ मीमांसा तर्कवि- २४
द्या च सुभक्तिर्भक्तवत्सला ॥ सुनाभिया-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

तना जातिर्गंभीरा भावगर्जिता ॥३॥ ना-
गपाशधरा मूर्तिरगाधा नागकुंडला ॥ सु-
चक्रा चक्रमध्यस्था चक्रकोणनिवासि-
नी ॥ ४ ॥ सर्वमंत्रमयी विद्या सर्वमंत्राक्ष-
रावलिः॥मधुस्रवा स्रवंती च भ्रामरी भ्र-
मरालका ॥ ५ ॥ मातृमंडलमध्यस्था मा-
तृमंडलवासिनी ॥६॥ कमारजननी क्रूरा सु-

Gandhi Memorial College Of Education Bantalab Jammu
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मुखीज्वरनाशिनी ॥६॥ अतीता विद्यमा- स०
ना च भाविनीप्रीतिमञ्जरी ॥ सर्वसौख्य-
वती युक्तिराहारपरिणामिनी ॥ ७ ॥ नि-
धानापञ्चभूतानांभवसागरतारिणी ॥ अ-
क्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता ॥८॥
रोहिणी भूमिगर्भा च कालभूः कालवर्ति- २८
नी ॥ कलंकरहिता नारी चतुःषष्ट्यभिधा-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

वती ॥९॥ जीर्णा च जीर्णवस्त्रा च नूतना
नववल्लभा ॥ अरजा च रतिप्रीतिरातिराग-
विवर्धिनी ॥ ११० ॥ पंचवातगतिर्भिन्ना
पंचश्लेष्माशयाधरा ॥ पंचपित्तवती श-
क्तिः पंचस्थानविभाविनी ॥११ ॥ उद-
क्या च वृषस्यंती बहिःप्रस्रवणी ऽ्यहा ॥
रजःशुक्रधरा शक्तिर्जरायुर्गर्भधारिणी

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

॥ १२ ॥ त्रिकालज्ञा त्रिलिंगा त्रिमूर्तिस्त्रि-
पुरवासिनी॥अरागा शिवतत्त्वा च काम-
तत्त्वानुरागिणी ॥१३॥ प्राच्यवाची प्र-
तीची दिगुदीची दिग्विदिग्दिशा ॥अहंकृ-
तिरहंकाराबालामाया बलिप्रिया॥१४॥
स्रुक्स्रुवा सामधेनी च सुश्रद्धा श्राद्धदेव-
ता ॥माता मातामही तृप्तिः पितृमातापि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तामही॥१५॥स्नुषा दौहित्रिणी पुत्री पौ-
त्रा नप्त्री शिशुप्रिया॥ स्तनदा स्तनधारा
च विश्वयोनिः स्तनंधयी॥ १६॥ शिशू-
त्संगधरा दोला दोलाक्रीडाभिनंदिनी॥
उर्वशी कदलीकेकाविशिखा शिखिवर्ति-
नी॥१७॥ खट्वांगधारिणी खट्वा बाणपुं-
खानुवर्तिनी॥ लक्ष्यप्राप्तिकरा लक्ष्याल-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
म० क्ष्या च शुभलक्षणा॥ १८ ॥ वर्तिनी सु- स०
२७ पथाचारापरिखा च खानिर्वृतिः॥प्राकार-
वलया वेला मर्यादा च महोदधौ॥१९॥
पोषिणी शोषिणी शक्तिर्दीर्घकेशी सुलो-
मशा॥ललितामांसला तन्वी वेदवेदांग-
धारिणी॥१२०॥नरासृक्पानमत्ता च न- २७
रमुण्डास्थिभूषणा॥ अक्षक्रीडारतिः सारी
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सारिका शुकभाषिणी ॥२१॥ शाबरी गा-
रुडीविद्या वारुणी वरुणार्चिता ॥ वाराही
तुंडहस्ता च दंष्ट्रोद्धृतवसुंधरा ॥ २२ ॥ मी-
नमूर्तिधरा मूर्ता वदान्याऽप्रतिमाश्रया ॥
अमूर्ता निधिरूपा च शालिग्रामशिला
शुचिः॥२३॥स्मृतिःसंस्काररूपा च सु-
संस्कारा च संस्कृतिः ॥ प्राकृता देशभाषा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सं० च गाथा गीतिः प्रहेलिका ॥ २४ ॥ इडा च स०
२८ पिंगला पिंगा सुषुम्णा सूर्यवाहिनी । शशि-
स्रवा च तालस्था काकिन्यमृतजीविनी
॥ २५ ॥ अणुरूपा बृहद्रूपा लघुरूपा गुरुः
स्थिरा ॥ स्थावरा जंगमा देवी कृतकर्मफ-
लप्रदा ॥ २६ ॥ विषयाक्रांतदेहा च निर्विशे- २८
षा जितेंद्रिया ॥ विश्वरूपा चिदानंदा पर-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
ब्रह्मप्रबोधिनी॥२७॥निर्विकारा च निर्वै-
रा विरतिः सत्यवर्धिनी॥पुरुषाज्ञा च भि-
न्ना च क्षांतिः कैवल्यदायिनी॥२८॥ वि-
विक्तसेविनी प्रज्ञा जनयित्री बहुश्रुतिः॥
निरीहा च समस्तैका सर्वलोकैकसेविता
॥२९॥सेवा सेवाप्रिया सेव्या सेवाफल-
विवर्धिनी॥कलौ कल्किप्रिया काली दु-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Gran

Gandhi Memorial College Of Education Bantalab Jammu
स० ष्टम्लेच्छविनाशिनी ॥१३०॥ प्रत्यंचा च स०
धनुर्यष्टिःखड्गधारा दुरानतिः ॥ अश्वप्लु-
तिश्च वल्गा च सृणिः सन्मृत्युवारणा
॥ ३१ ॥ वीरभूर्वीरमाता च वीरसूर्वीरनं-
दिनी॥ जयश्रीर्जयदीक्षा च जयदा जय-
वर्धिनी॥ ३२ ॥ सौभाग्यसुभगाकारा २९
सर्वसौभाग्यवर्धिनी॥ क्षेमंकरी सिद्धिरू-
CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पा सत्कीर्तिः पार्थदेवता ॥ ३३ ॥ सर्वतीर्थमयी मूर्तिः सर्वदेवमयी प्रभा॥ सर्वसिद्धिप्रदा शक्तिःसर्वमंगलमंगला ॥ ३४ ॥ पुण्यं सहस्रनामेदं शिवाया शिवभाषितम् ॥ यःपठेत्प्रातरुत्थायशुचिर्भूत्वा समाहितः॥३५ ॥ यश्चापि शृणुयान्नित्यं नरो निश्चलमानसः॥एककालं द्विकालंवात्रि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अ० कालं श्रद्धयान्वितः ॥३६॥ सर्वदुःखवि- स०
३० निर्मुक्तो धनधान्यसमन्वितः ॥ तेजस्वी
बलवाञ्छूरःशोकरोगविवर्जितः ॥ ३७॥
यशस्वी कीर्तिमान् धन्यः सुभगो लोकपू-
जितः॥ रूपवान् गुणसंपन्नः प्रभावीर्य-
समन्वितः॥ ३८॥ श्रेयांसि लभते नित्यं ३०
निश्चलां च शुभां श्रियम् ॥ सर्वपापवि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
निर्मुक्तो लोभक्रोधविवर्जितः ॥ ३९ ॥
नित्यं बंधुसुतैर्दारैः पुत्रपौत्रैर्महोत्सवैः॥ नं-
दितः सेवितो भृत्यैर्बहुभिःशुचिमानसैः
॥ १४० ॥ विद्यानां पारगो विप्रःक्षत्रियो
विजयी रणे ॥ वैश्यस्तु धनलाभाढ्यःशूद्रः
सुखमवाप्नुयात् ॥ ४१॥ पुत्रार्थी लभते पुत्रं
धनार्थी विपुलं धनम् ॥ इच्छाकामं तु का-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मार्थी धर्मार्थी धर्ममक्षयम् ॥ ४२ ॥ क-
न्यार्थी लभते कन्यां रूपशीलगुणान्वि-
ताम् ॥ क्षेत्रं चबहुसस्यंस्याद्गावस्तुबहुदु-
ग्धदाः ॥४३॥ नाशुभं नापदस्तस्य नभयं
नृपशत्रुतः ॥ जायते नाशुभाद्बुद्धिर्लभते
कुलधुर्यताम् ॥ ४४ ॥ न बाधंते ग्रहास्त-
स्य न रक्षांसि न पन्नगाः ॥ न पिशाचा न

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

डाकिन्यो भूतव्यंतरजंबुकाः॥४५॥बाल-
ग्रहाभिभूतानां बालानां शांतिकारकम्॥
द्वंद्वानां प्रीतिभेदे च मैत्रीकरणमुत्तमम्
॥४६॥ लोहपाशैर्दृढैर्बद्धो बद्धो वेश्मनि
दुर्गमे॥ तिष्ठन् शृण्वन् पठन्मर्त्यो मुच्यते
नात्र संशयः॥४७॥ न दाराणां न पुत्राणां
न बंधूनां न मित्रजम्॥ पश्यंति ते न शोकं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Gran

Gandhi Memorial College Of Education Bantalab Jammu
हि वियोगं चिरजीवितम् ॥ ४८ ॥ अंध-
स्तु लभतेदृष्टिं चक्षुरोगैर्न बाधते ॥ बाधिरः
श्रुतिमाप्नोति मूकोवाचं शुभां नरः ॥ ४९ ॥
पतद्गर्भा च या नारी स्थिरगर्भा प्रजायते ॥
स्राविणी बद्धगर्भा च सुखमेव प्रसूयते
॥ १५० ॥ कुष्ठिनः शीर्णदेहा येगतकेशन- ३२
खत्वचः ॥ पठनाच्छ्रवणाद्वापि दिव्यका-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
या भवंति ते ॥ ५१ ॥ ये पठंति सदा मर्त्याः
शुचिष्मंतो जितेंद्रियाः ॥ अपुत्राः प्राप्नुयुः
पुत्रान्धनवंतोऽपि न संशयः ॥ ५२ ॥
महाव्याधिपरिग्रस्तास्तप्ता ये विविधैः
ज्वरैः ॥ भूताभिषंगसंघातैश्चातुर्थिकतृती-
यकैः ॥ ५३ ॥ अन्यैश्च दारुणै रोगैः
पीडयमानाश्च मानवाः ॥ गतबाधाः
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
भ प्रजायंते तैर्मुक्ता नात्र संशयः ॥ ५४ ॥ स०
३ श्रुतिग्रंथधरो बालो दिव्यवादी कवी-
श्वरः ॥ पठनाच्छ्रवणाद्वापि भवत्येव न
संशयः ॥ ५५ ॥ अष्टम्यां वा चतुर्दश्यां
नवम्यां चैकचेतसः ॥ ये पठंति सदा
मर्त्या न ते वै दुःखभाजनाः ॥ ५६ ॥ ३३
नवरात्रं जिताहारो दृढभक्तिर्जितेंद्रियः ॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

चण्डिकायतने विद्वान् शुचिष्मान्मूर्तिस-
न्निधौ ॥ ५७॥ एकाकी तु शतावृत्त्यापठ-
न्धीरश्च निर्भयः ॥ साक्षाद्भगवती तस्मै
प्रयच्छेदीप्सितं फलम् ॥ ५८ ॥ सिद्ध-
पीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये ॥
पठनात्साधकस्याशु सिद्धिर्भवतिवांछि-
ता ॥ ५९ ॥ दशावर्तं पठेद्यस्तु भामि-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

शायी नरः शुचिः ॥ स्वप्ने मूर्तिमयीं
Gandhi Memorial College Of Education Bantalab Jammu
देवीं वरदां सोऽपि पश्यति ॥ १६० ॥
कवित्वं संस्कृते तेषां शास्त्राणां व्याकृतौ
सुतः ॥ शक्तिः प्रोन्मीलयते शास्त्रेष्वन-
धीतेषु भारती ॥ ६१ ॥ आवर्तनसह-
स्रैर्यैः पठन्ति पुरुषोत्तमाः ॥ ते सिद्धाः ३४
सिद्धिदा लोके शापानुग्रहणे क्षमाः ॥ ६२ ॥
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

नखरागशिरोरत्नाद्विगुणीकृतरोचिषः ॥
प्रयच्छंतश्च सर्वस्वं सेवंते तान्महीश्वराः ॥ ६३ ॥ रोचनालिखितं भूर्जे
कुंकुमेन शुभे दिने ॥ धारयेद्यंत्रितं देहे
पूजयित्वा कुमारिकाम् ॥ ६४ ॥ विप्रांऽश्च
वरनारींश्च धूपैः कुसुमचंदनैः क्षीरखंडाज्यभोज्यैश्च पूजयित्वा सुभूषिताः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

॥ ६५ ॥ बध्नंति ये महारक्षां बालानां स०
च विशेषतः ॥ भवंति नृपपूज्यास्ते
कीर्तिभाजो यशस्विनः ॥ ६६ ॥ शत्रुतो
न भयं तेषां दुर्जनेभ्यो न राजतः ॥ न च
दाराभिचारेभ्यो न दारिद्र्यं स पश्य-
ति॥६७॥ महार्णवे महानद्यां स्थितेऽपि ३९
च न भीः क्वचित् ॥ रणे द्यूते विवादे च

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
विजयं प्राप्नुवंति ते ॥ ६८ ॥ नृपाश्चवश्य-
तां यांति नृपमान्याश्च ये नराः ॥ सर्वत्र
पूजिता लोके बहुमानपुरः सराः ॥६९॥
रतिरागविवृद्धाश्च विह्वलाः कामपीडि-
ताः ॥ यौवनाक्रांतदेहास्ता श्रूयंते वा-
मलोचनाः ॥ १७० ॥ लिखितं मूर्ध्नि
कंठे वा धारयेद्यो रणे शुचिः ॥ शतधा
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

युध्यमानं तं प्रति योद्धा न पश्यति स०
॥ ७१ ॥ केतौ वा दुंदुभौ येषां तिष्ठते
लिखितं रणे ॥ मायासैन्यपरिग्रस्तां
कांदिशीकान् हतौजसः ॥ ७२ ॥ विचे
तनान्विमूढांश्च शत्रुकृतपरिवर्जितान् ॥
निर्जित्य शत्रुसंघातांल्लभते वियजं ध्रुवम् ३६
॥ ७३ ॥ नाभिचारो न शापश्च चाणवीरा-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

दिकीलनम् ॥ डाकिनी पूतना कृत्या
महामारी च शाकिनी ॥७४ ॥ भूताःप्रेता
पिशाचाश्च रक्षांसि व्यंतरादयः ॥ न वसं-
ति गृहे देहे लिखितं यत्र तिष्ठति ॥ ७५ ॥
न शस्त्रानलतोयौघाद्भयं तस्योपजायते ॥
दुर्वृत्तानां च पापानां बलहानिकरं
परम् ॥ ७६ ॥ मंदुराकरिशालासु गवां

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प० गोष्ठे समाहितः ॥ पठेत्तद्दोषशान्त्यर्थं कूटं स०
७ कपटनाशिनी ॥ ७७ ॥ यमदूतान्न पश्यंति
न ते निरययातनाम् ॥ प्राप्नुवंति क्षयं
प्रांते शिवलोकं सनातनम् ॥ ७८ ॥ स-
र्वाबाधासु घोरासु सर्वदुःखनिवारणम् ॥
सुमंगलकरं स्वर्ग्यं पठितव्यं समाहितैः ३९
॥ ७९ ॥ श्रोतव्यं च सदा भक्त्या परं स्व-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्त्ययनं महत्॥पुण्यं सहस्रनामेदमंबाया रुद्रभाषितम्॥ १८० ॥ चतुर्वर्गप्रदं सत्यं नंदिकेन प्रकाशितम् ॥ नातःपरतरो मंत्रो नातःपरतरः स्तवः ॥ ८१ ॥नातः परतरा विद्या तीर्थं नातः परात्परम् ॥ ते धन्यकृतपुण्यास्ते त एव भुवि पूजिताः ॥ ८२ ॥ एकवारं मुदानित्यं येऽर्चयंति महेश्वरीम्॥

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

देवतानां देवता या ब्रह्माद्यैर्या च पूजिता
Gandhi Memorial College Of Education Bantalab Jammu
॥ ८३ ॥ भूयात्सा वरदा लोके साधूनां
विश्वमंगला ॥ एतामेव पुराराध्यां विद्यां
त्रिपुरभैरवीम् ॥ त्रैलोक्यमोहिनीरूपम-
काषीद्भगवान् हरिः ॥ १८४ ॥ ३८

इति श्रीरुद्रयामले तंत्रे नंदिकेश्वरसंवादे महाप्रभावो
भवानीनामसहस्रः स्तवराजः संपूर्णः ।

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ॐ श्रीगणेशाय नमः ॥ ॐ अस्य श्रीइंद्राक्षीस्तोत्रमंत्रस्य ॥ पुरंदरऋषिः अनुष्टुप्छंदः ॥ इंद्राक्षीदेवता ॥ ह्रीं बीजम् ॥ क्लीं कीलकम् ॥ सकलकामनासिद्ध्यर्थे पाठे विनियोगः अथ ध्यानम् ॥ इंद्राक्षीं द्विभुजां देवीं पीतवस्त्रधरां शुभाम् ॥ वामे हस्ते वज्रधरां दक्षिणेचाभय-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

१० प्रदाम् ॥ १ ॥सहस्रनेत्रां सूर्याभां नानालं- १०
३९ कारभूषिताम् ॥ प्रसन्नवदनां नित्यमप्स-
रोगणसेविताम् ॥ २ ॥श्रीदुर्गां सौम्यवद-
नां पाशांकुशधरां पराम् त्रैलोक्यमो-
हिनीं देवीं भवानीं प्रणमाम्यहम् ॥ ३ ॥
इति ध्यानम ॥ ॐ ह्रीं श्रीं इंद्राक्षीं श्रीं पें ३९
स्वाहा॥इंद्र उवाच॥इंद्राक्षी नाम सा देवी

Gandhi Memorial College Of Education Bantalab Jammu
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

दैवतैः समुदाहृता ॥ गौरी शाकम्भरी देवी
दुर्गानाम्नीतिविश्रुता ॥ १ ॥ कात्यायनी
महादेवी चंद्रघंटा महातपाः ॥ गायत्री सा
च सावित्री ब्रह्माणी ब्रह्मवादिनी ॥ २ ॥
नारायणी भद्रकाली रुद्राणी कृष्णपिंग-
ला ॥ अग्निज्वाला रौद्रमुखी कालरात्रि-
स्तपस्विनी ॥ ३ ॥ मेघश्यामा सहस्राक्षी

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

विष्णुमाया जलोदरी ॥ महोदरी मुक्त-
केशी घोररूपा महाबला ॥ ४ ॥ आनंदा
भद्रजा नंदा रोगहंत्री शिवप्रिया ॥ शिव-
दूती कराली च प्रत्यक्षा परमेश्वरी ॥ ५ ॥
इंद्राणी चंद्ररूपा च इंद्रशक्तिपरायणा ॥
महिषासुरसंहर्त्री चामुंडा गर्भदेवता ॥ ६ ॥ ४०
वाराही नारसिंही च भीमा भैरवना-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu
दिनी ॥ श्रुतिः स्मृतिर्धृतिर्मेधा विद्या
लक्ष्मीः सरस्वती ॥ ७ ॥ आनंदा विजया
पूर्णा मानस्तोकापराजिता ॥ भवानी
पार्वती दुर्गा हैमवत्यंबिका शिवा ॥ ८ ॥
शिवा भवानी रुद्राणी शंकरार्धशरी-
रिणी ॥ एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण
धीमता ॥ ९ ॥ आयुरारोग्यमैश्वर्यं सुख-
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

संपत्तिकारकम् ॥ अथापस्मारकुष्ठादि- स०
त... ...निवारणम् ॥ १० ॥ शतमाव-
र्तयेद्यस्तुमुच्यते व्याधिबंधनात् ॥ आव-
र्तयेत्सहस्रेण लभते वांछितं फलम्
॥ ११ ॥ राज्यवश्यमवाप्नोति सर्वमेव
न संशयः ॥ लक्षमेकं जपेद्यस्तु साक्षाद्देवी
भविष्यति ॥ १२ ॥ त्रिकालं पठते नि... ४१

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

धनधान्यं च संपदः ॥ अर्धरात्रे पठेन्नित्यं
मुच्यते पापबंधनात् ॥ १३ ॥ इदं स्तोत्र-
मिदं पुण्यं जपे तु फलमाप्नुयात् ॥ विना-
शयति रोगाणामपमृत्युं हरत्युत ॥ १४ ॥
राज्यार्थी लभते राज्यं धनार्थी विपुलं
व [illegible] इच्छाकामं तु कामार्थी धर्मार्थी
धर्मनक्षयम ॥ १५ ॥ विद्यार्थी लभते

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

विद्यां मोक्षार्थी परमं पदम् ॥ इन्द्रेण क-
थितं स्तोत्रं सत्यं सत्यं न संशयः ॥ १६ ॥
इति श्रीइन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥ ❀ ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज--गंगाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितम् ।
शकाब्दाः १८४८, संवत् १९८३ ।

पुस्तकें मिलनेका ठिकाना—गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापखाना, कल्याण-मुंबई.

अस्य सर्वेऽधिकारा यन्त्रालयाध्यक्षेण स्वायत्ताः

Gandhi Memorial College Of Education Bantalab Jammu
G.M. ... Bantalab
Acc. No. 212 D.
Dated 6.10.03
CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

की० रु० आ०	नाम	की० रु० आ०
...य बड़ी ... टी० .... ०—१	गिरीशस्तोत्र	.... ०—१
...त्र	देव्यपराधक्षमापनस्तोत्र	.... ०—१
.... ०—१	नारायणवर्म—मूल	....
.... ०—६	नृसिंहसहस्रनाम	
...मावली .... ०—२	नृसिंहकवच	
...० टी० .... ०—४	नृसिंहस्तुति—...	
....०—॥।	परमेश्वर...	
...नाम .... ०—४		

पुस्तकें मिलनेका ठिकाना—गंगाविष...

...छापखाना

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant